# देवी कवचम्

ॐ नमश्चण्डिकायै ।

मार्कण्डेय उवाच ।
ॐ यद्गुह्यं परमं लोके सर्वरक्षाकरं नृणाम् ।
यन्न कस्यचिदाख्यातं तन्मे ब्रूहि पितामह ॥ १॥

ब्रह्मोवाच ।
अस्ति गुह्यतमं विप्र सर्वभूतोपकारकम् ।
देव्यास्तु कवचं पुण्यं तच्छृणुष्व महामुने ॥ २॥

प्रथमं शैलपुत्री च द्वितीयं ब्रह्मचारिणी ।
तृतीयं चन्द्रघण्टेति कूष्माण्डेति चतुर्थकम् ॥ ३॥

पञ्चमं स्कन्दमातेति षष्ठं कात्यायनी च ।
सप्तमं कालरात्रिति महागौरीति चाष्टमम् ॥ ४॥

नवमं सिद्धिदात्री च नवदुर्गाः प्रकीर्तिताः ।
उक्तान्येतानि नामानि ब्रह्मणैव महात्मना ॥ ५॥

अग्निना दह्य मानस्तु शत्रु मध्येगतो रणे ।
विषमे दुर्गमे चैव भयार्ताः शरणं गताः ॥ ६।

न तेषां जायते किञ्चित् अशुभं रणसङ्कटे ।

नापदं तस्य पश्यामि शोक दुःख भयं न हि ॥ ७॥

यैस्तु भक्त्या स्मृता नूनं तेषां वृद्धिः प्रजायते ।
ये त्वां स्मरन्ति देवेशि रक्षसे तान्न संशयः ॥ ८॥

प्रेत संस्था तु चामुण्डा वाराही महिषासना ।
ऐन्द्री गज समारूढा वैष्णवी गरुडासना ॥ ९॥

माहेश्वरी वृषारूढा कौमारी शिखि वाहना ॥ १०॥
लक्ष्मीः पद्मासना देवी पद्महस्ता हरिप्रिया ।

श्वेतरूप धरा देवी ईश्वरी वृष वाहना ॥ ११॥
ब्राह्मी हंस समारूढा सर्वाभरण भूषिता ।

इत्येता मातरः सर्वाः सर्वयोग समन्विताः ॥ १२॥
नानाभरण शोभाढ्या नानारत्नोप शोभिताः ।

दृश्यन्ते रथमारूढा देव्यः क्रोध समाकुलाः ॥ १४॥
शङ्खं चक्रं गदां शक्तिं हलं च मुसलायुधम् ।

खेटकं तोमरं चैव परशुं पाशमेव च ॥ १५॥
कुन्तायुधं त्रिशूलं च शार्ङ्ग मायुध मुत्तमम् ।

दैत्यानां देह नाशाय भक्ताना मभयाय च ॥ १६॥
धारयन्त्यायुधा नीत्थं देवानां च हिताय वै ।

नमस्तेऽस्तु महारौद्रे महाघोर पराक्रमे ॥ १७॥
महाबले महोत्साहे महाभय विनाशिनि ।

त्राहि मां देवि दुष्प्रेक्ष्ये शत्रूणां भयवर्धिनि ॥ १८॥
प्राच्यां रक्षतु मामैन्द्री आग्नेय्या मग्नि देवता ।

दक्षिणेऽवतु वाराही नैर्ऋत्यां खड्ग धारिणी ॥ १९॥
प्रतीच्यां वारुणी रक्षेत् वायव्यां मृगवाहिनी ।

उदीच्यां पातु कौमारी ऐशान्यां शूल धारिणी ॥ २०॥
ऊर्ध्वं ब्रह्माणी मे रक्षेत् अधस्ता द्वैष्णवी तथा ।

एवं दश दिशो रक्षे च्चामुण्डा शव वाहना ॥ २१॥
जया मे चाग्रतः पातु विजया पातु पृष्ठतः ।

अजिता वाम पार्श्वे तु दक्षिणे चापराजिता ॥ २२॥
शिखा मुद्योतिनी रक्षेत् उमा मूर्ध्नि व्यवस्थिता ।

मालाधरी ललाटे च भ्रुवौ रक्षेद्यशस्विनी ॥ २३॥
त्रिनेत्रा च भ्रुवोर्मध्ये यमघण्टा च नासिके ।

शङ्खिनी चक्षुषो र्मध्ये श्रोत्रयो र्द्वार वासिनी ।
कपोलौ कालिका रक्षेत् कर्णमूले तु शांकरी ॥ २५॥

नासिकायां सुगन्धा च उत्तरोष्ठे च चर्चिका ।
अधरे चामृतकला जिह्वायां च सरस्वती ॥ २६॥

दन्तान् रक्षतु कौमारी कण्ठदेशे तु चण्डिका ।
घण्टिकां चित्रघण्टा च महामाया च तालुके ॥ २७॥

कामाक्षी चिबुकं रक्षेत् वाचं मे सर्वमङ्गला ।
ग्रीवायां भद्रकाली च पृष्ठवंशे धनुर्धरी ॥ २८॥

नीलग्रीवा बहिः कण्ठे नलिकां नलकूबरी ।
स्कन्धयोः खड्गिनी रक्षेद् बाहू मे वज्र धारिणी ॥ २९॥

हस्तयो र्दण्डिनी रक्षेत् अम्बिका चाङ्गुलीषु च ।
नखाञ्छूलेश्वरी रक्षेत् कुक्षौ रक्षेत्कुलेश्वरी ॥ ३०॥

स्तनौ रक्षेन्महादेवी मनः शोक विनाशिनी ।
हृदये ललिता देवी उदरे शूल धारिणी ॥ ३१॥

नाभौ च कामिनी रक्षेद् गुह्यं गुह्येश्वरी तथा ।
पूतना कामिका मेढ्रं गुदे महिष वाहिनी ॥ ३२॥

कट्यां भगवती रक्षेज्जानुनी विन्ध्य वासिनी ।
जङ्घे महाबला रक्षेत् सर्वकाम प्रदायिनी ॥ ३३॥

गुल्फयो र्नारसिंही च पादपृष्ठे तु तैजसी ।
पादाङ्गुलीषु श्री रक्षेत् पादाधस्तल वासिनी ॥ ३४॥

नखान् दंष्ट्राकराली च केशांश्चै वोर्ध्व केशिनी ।

रोम कूपेषु कौबेरी त्वचं वागीश्वरी तथा ॥ ३५॥

रक्त मज्जावसा मांसान्यस्थि मेदांसि पार्वती ।
अन्त्राणि कालरात्रिश्च पित्तं च मुकुटेश्वरी ॥ ३६॥

पद्मावती पद्मकोशे कफे चूडामणि स्तथा ।
ज्वालामुखी नखज्वालां अभेद्या सर्व सन्धिषु ॥ ३७॥

शुक्रं ब्रह्माणी मे रक्षेच्छायां छत्रेश्वरी तथा ।
अहङ्कारं मनो बुद्धिं रक्षेन्मे धर्म धारिणी ॥ ३८॥

प्राणापानौ तथा व्यानं उदानं च समानकम् ।
वज्रहस्ता च मे रक्षेत् प्राणं कल्याण शोभना ॥ ३९॥

रसे रूपे च गन्धे च शब्दे स्पर्शे च योगिनी ।
सत्त्वं रजस्तमश्चैव रक्षेन्नारायणी सदा ॥ ४०॥

आयू रक्षतु वाराही धर्मं रक्षतु वैष्णवी ।
यशः कीर्तिं च लक्ष्मीं च धनं विद्यां च चक्रिणी ॥ ४१॥

गोत्र मिन्द्राणी मे रक्षेत् पशून्मे रक्ष चण्डिके ।
पुत्रान् रक्षेन्महालक्ष्मी र्भार्यां रक्षतु भैरवी ॥ ४२॥

पन्थानं सुपथा रक्षेन्मार्गं क्षेमकरी तथा ॥ ४३॥
राजद्वारे महालक्ष्मी र्विजया सर्वतः स्थिता ।

रक्षाहीनं तु यत् स्थानं वर्जितं कवचेन तु ॥ ४४॥
तत्सर्वं रक्ष मे देवि जयन्ती पाप नाशिनी ।

पदमेकं न गच्छेत् तु यदीच्छेच्छुभ मात्मनः ॥ ४६॥
कवचे नावृतो नित्यं यत्र यत्रैव गच्छति ।

तत्र तत्रार्थ लाभश्च विजयः सार्व कामिकः ॥ ४७॥
यं यं चिन्तयते कामं तं तं प्राप्नोति निश्चितम् ।

परमैश्वर्य मतुलं प्राप्स्यते भूतले पुमान् ॥ ४८॥

निर्भयो जायते मर्त्यः सङ्ग्रामेष्व पराजितः ।
त्रैलोक्ये तु भवेत्पूज्यः कवचेनावृतः पुमान् ॥ ४९॥

इदं तु देव्याः कवचं देवाना मपि दुर्लभम् ।
यः पठेत्प्रयतो नित्यं त्रिसन्ध्यं श्रद्धयान्वितः ॥ ५०॥

दैवीकला भवेत्तस्य त्रैलोक्येष्व पराजितः ।
जीवेद्वर्ष शतं साग्रं अपमृत्यु विवर्जितः ॥ ५१॥

नश्यन्ति व्याधयः सर्वे लूता विस्फोटकादयः ।
स्थावरं जङ्गमं चैव कृत्रिमं चापि यद्विषम् ॥ ५२॥

अभिचाराणि सर्वाणि मन्त्र यन्त्राणि भूतले ।
भूचराः खेचराश्चैव जलजाश्चोप देशिकाः ॥ ५३॥

सहजा कुलजा माला डाकिनी शाकिनी तथा ।
अन्तरिक्ष चरा घोरा डाकिन्यश्च महाबलाः ॥ ५४॥

ग्रहभूत पिशाचाश्च यक्ष गन्धर्व राक्षसाः ।
ब्रह्मराक्षस वेतालाः कूष्माण्डा भैरवादयः ॥ ५५॥

नश्यन्ति दर्शनात्तस्य कवचे हृदि संस्थिते ।
मानोन्नति र्भवेद्राज्ञस् तेजो वृद्धिकरं परम् ॥ ५६॥

यशसा वर्धते सोऽपि कीर्ति मण्डित भूतले ।
जपेत् सप्तशतीं चण्डीं कृत्वा तु कवचं पुरा ।

यावद्भूमण्डलं धत्ते सशैलवन काननम् ।
तावत्तिष्ठति मेदिन्यां सन्ततिः पुत्र पौत्रिकी ॥ ५९॥

देहान्ते परमं स्थानं यत्सुरै रपि दुर्लभम् ।
प्राप्नोति पुरुषो नित्यं महामाया प्रसादतः ॥ ६०॥

लभते परमं रूपं शिवेन सह मोदते ॥ ६१॥ ॐ ॥

॥ इति श्रीदेवी कवचं समाप्तम् ॥